श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते उद्धवगीतासु

# ॥ त्रयोविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ त्रयोविंशोऽध्यायः ॥

श्रीभगवानुवाच
परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्।
विश्वमेकामकं पश्यन् प्रकृत्या पुरुषेण च॥ **23.1** ॥

परस्वभावकर्माणि यः प्रशंसति निन्दति।
स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः॥ **23.2** ॥

तैजसे निद्रयाऽऽपन्ने पिण्डस्थो नष्टचेतनः।
मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान्॥ **23.3** ॥

किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्।
वाचोदितं तदनृतं मनसा ध्यातमेव च॥ **23.4** ॥

छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः।
एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम्॥ **23.5** ॥

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः।
त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः॥ **23.6** ॥

तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः।
निरूपितेयं त्रिविधा निर्मूल भातिरात्मनि।
इदं गुणमयं विद्धि त्रिविधं मायया कृतम्॥ **23.7** ॥

एतद् विद्वान् मदुदितं ज्ञानविज्ञाननैपुणम्।
न निन्दति न च स्तौति लोके चरति सूर्यवत्॥ **23.8** ॥

प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा।
आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह॥ **23.9**॥

श्रीउद्धव उवाच
नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः।
अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते॥ **23.10**॥

आत्माव्ययोऽगुणः शुद्धः स्वयञ्ज्योतिरनावृतः।
अग्निवद् दारुवदचिद् देहः कस्येह संसृतिः॥ **23.11**॥

श्रीभगवानुवाच
यावद् देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम्।
संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः॥ **23.12**॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा॥ **23.13**॥

यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्।
स एव प्रतिबुद्धस्य न वै मोहाय कल्पते॥ **23.14**॥

शोकहर्षभयक्रोध लोभमोहस्पृहादयः।
अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः॥ **23.15**॥

देहेन्द्रियप्राणमनोऽभिमानो
 जीवोऽन्तरात्मा गुणकर्ममूर्तिः।
सूत्रं महानित्युरुधेव गीतः
 संसार आधावति कालतन्त्रः॥ **23.16**॥

अमूलमेतद् बहुरूपरूपितं
 मनोवचःप्राणशरीरकर्म।

ज्ञानासिनोपासनया शितेन -
च्छित्त्वा मुनिर्गां विचरत्यतृष्णः ॥ **23.17** ॥

ज्ञानं विवेको निगमस्तपश्च
प्रत्यक्षमैतिह्यमथानुमानम्।
आद्यन्तयोरस्य यदेव केवलं
कालश्च हेतुश्च तदेव मध्ये ॥ **23.18** ॥

यथा हिरण्यं स्वकृतं पुरस्तात्
पश्चाच्च सर्वस्य हिरण्मयस्य।
तदेव मध्ये व्यवहार्यमाणं
नानापदेशैरहमस्य तद्वत् ॥ **23.19** ॥

विज्ञानमेतत्त्रियवस्थमङ्ग
गुणत्रयं कारणकर्यकर्तृ।
समन्वयेन व्यतिरेकतश्च
येनैव तुर्येण तदेव सत्यम् ॥ **23.20** ॥

न यत् पुरस्तादुत यन्न पश्चा -
न्मध्ये च तन्न व्यपदेशमात्रम्।
भूतं प्रसिद्धं च परेण यद् य -
त्तदेव तत् स्यादिति मे मनीषा ॥ **23.21** ॥

अविद्यमानोऽप्यवभासते यो
वैकारिको राजससर्ग एषः।
ब्रह्म स्वयं ज्योतिरतो विभाति
ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥ **23.22** ॥

एवं स्फुटं ब्रह्मविवेकहेतुभिः
परापवादेन विशारदेन।

छित्त्वाऽऽत्मसन्देहमुपारमेत
    स्वानन्दतुष्टोऽखिलकामुकेभ्यः ॥ **23.23** ॥

नात्मा वपुः पार्थिवमिन्द्रियाणि
    देवा ह्यसुर्वायुजलं हुताशः।
मनोऽन्नमात्रं धिषणा च सत्त्व -
    महङ्कृतिः खं क्षितिरर्थसाम्यम् ॥ **23.24** ॥

समाहितैः कः करणैर्गुणात्मभि -
    र्गुणो भवेन्मत् सुविविक्तधाम्नः।
विक्षिप्यमाणैरुत किं नु दूषणं
    घनैरुपेतैर्विगतै रवेः किम् ॥ **23.25** ॥

यथा नभो वाय्वनलाम्बुभूगुणै -
    र्गतागतैर्वर्तुगुणैर्न सज्जते।
तथाक्षरं सत्त्वरजस्तमोमलै -
    रहंमतेः संसृतिहेतुभिः परम् ॥ **23.26** ॥

तथापि सङ्गः परिवर्जनीयो
    गुणेषु मायारचितेषु तावत्।
मद्भक्तियोगेन दृढेन यावद्
    रजो निरस्येत मनःकषायः ॥ **23.27** ॥

यथाऽऽमयोऽसाधुचिकित्सितो नृणां
    पुनः पुनः सन्तुदति प्ररोहन्।
एवं मनोऽपक्वकषायकर्म
    कुयोगिनं विध्यति सर्वसङ्गम् ॥ **23.28** ॥

कुयोगिनो ये विहितान्तरायै -
    र्मनुष्यभूतैस्त्रिदशोपसृष्टैः।

ते प्राक्तनाभ्यासबलेन भूयो
युञ्जन्ति योगं न तु कर्मतन्त्रम्॥ 23.29 ॥

करोति कर्म क्रियते च जन्तुः
केनाप्यसौ चोदित आनिपातात्।
न तत्र विद्वान् प्रकृतौ स्थितोऽपि
निवृत्ततृष्णः स्वसुखानुभूत्या॥ 23.30 ॥

तिष्ठन्तमासीनमुत व्रजन्तं
शयानमुक्षन्तमदन्तमन्नम्।
स्वभावमन्यत् किमपीहमान -
मात्मानमात्मस्थमतिर्न वेद॥ 23.31 ॥

यदि स्म पश्यत्यसदिन्द्रियार्थं
नानानुमानेन विरुद्धमन्यत्।
न मन्यते वस्तुतया मनीषी
स्वाप्नं यथोत्थाय तिरोदधानम्॥ 23.32 ॥

पूर्वं गृहीतं गुणकर्मचित्र -
मज्ञानमात्मन्यविविक्तमङ्ग।
निवर्तते तत् पुनरीक्षयैव
न गृह्यते नापि विसृज्य आत्मा॥ 23.33 ॥

यथा हि भानोरुदयो नृचक्षुषां
तमो निहन्यान्न तु सद् विधत्ते।
एवं समीक्षा निपुणा सती मे
हन्यात्तमिस्रं पुरुषस्य बुद्धेः॥ 23.34 ॥

एष स्वयञ्ज्योतिरजोऽप्रमेयो
महानुभूतिः सकलानुभूतिः।

एकोऽद्वितीयो वचसां विरामे
येनेषिता वागसवश्चरन्ति ॥ **23.35** ॥

एतावानात्मसम्मोहो यद् विकल्पस्तु केवले।
आत्मन्नृते स्वमात्मानमवलम्बो न यस्य हि ॥ **23.36** ॥

यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम्।
व्यर्थेनाप्यर्थवादोऽयं द्वयं पण्डितमानिनाम् ॥ **23.37** ॥

योगिनोऽपक्वयोगस्य युञ्जतः काय उत्थितैः।
उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ॥ **23.38** ॥

योगधारणया कांश्चिदासनैर्धारणान्वितैः।
तपोमन्त्रौषधैः कांश्चिदुपसर्गान् विनिर्दहेत् ॥ **23.39** ॥

कांश्चिन्ममानुध्यानेन नामसङ्कीर्तनादिभिः।
योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ॥ **23.40** ॥

केचिद् देहमिमं धीराः सुकल्पं वयसि स्थिरम्।
विधाय विविधोपायैरथ युञ्जन्ति सिद्धये ॥ **23.41** ॥

न हि तत् कुशलादृत्यं तदायासो ह्यपार्थकः।
अन्तवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥ **23.42** ॥

योगं निषेवतो नित्यं कायश्चेत् कल्पतामियात्।
तच्छ्रद्दध्यान्न मतिमान् योगमुत्सृज्य मत्परः ॥ **23.43** ॥

योगचर्यामिमां योगी विचरन् मदपाश्रयः।
नान्तरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ॥ **23.44** ॥

॥ इति उद्धवगीतासु त्रयोविंशोऽध्यायः समाप्तः ॥